## मदीयहृदय

मदीयहृदयगिरिदरीषु भावनानदी ।
वहति घोषमाकलयतु भावुको यदि ।।

स्वर्गतुल्यभूमिरियं परमपावनी
म्लेच्छसंस्कृतिर्माभूदस्य नाशिनी ।। १ ।।

इह पुरुषः श्रीरामः खलु नारी सीता ।
लसतु पुनर्गृहे गृहे भगवद्गीता ।। २ ।।

करणीयं सत्संस्कृतिरक्षणं यदि ।
प्रतिवदनं लसतु मुहुर्संस्कृतवाणी ।। ३ ।।